ARYAVART SHODH VIKAS PATRIKA
RNI TITLED NO. UPBIL04292RNI
REG. NO. UPBIL/2014/66218 **PP. No.- 174-175**
ISSN NO.- 2347 – 2944 (Print)
e-ISSN NO.- 2582 – 2454 (Online)
Vol.-18, No.-IV, Issues-34, YEAR-Oct-Dec. 2024

# आनन्द–तत्त्वम् अद्वैत–वेदान्तदर्शनञ्च

**डॉ0 जितेन्द्र कुमार द्विवेदी**
कमला राय महाविद्यालयः, गोपालगंजम्, जयप्रकाश विश्वविद्यालयः, छपरा (बिहार) भारत

**Received-01.12.2024, Revised-08.12.2024, Accepted-14.12.2024 E-mail : aaryvart2013@gmail.com**

***सारांशः*** *भारतीय–परम्परायां मुख्यतया षड्–आस्तिक–दर्शनानि वर्तन्ते। तेषु वेदान्त–दर्शनम् अन्यतमम्। वेदान्तदर्शनस्य आधारभूताः ग्रन्थाः उपनिषदः, ब्रह्मसूत्रम्, श्रीमद्भगवद्गीतादयः ग्रन्थाः सन्ति। यत्–प्राप्त्यनन्तरं केनापि प्रकारेण दुःखस्य लेशमात्रापि न तिष्ठेत्, तदेव 'आनन्दतत्त्वम्' इत्युच्यते। आनन्द–तत्त्व–प्राप्तये बहवः मार्गाः शास्त्रेषु प्राप्यन्ते। जीवात्मनोः ऐक्यमेव आनन्दतत्त्वस्य वास्तविक–स्वरुपम् अस्ति। सुषुप्त्यवस्थायां स्वरुपानन्दस्य अनुभूतिः भवति। सांख्य–दर्शनस्य सूत्रेष्वपि महर्षि–कपिलेन एतत् स्पष्टीकृतं वर्तते यत् "समाधि–सुषुप्ति–मोक्षेषु एतासु त्रिषु अवस्थासु आनन्दानुभव–कारणेन आत्मा ब्रह्मरुपतां प्राप्नोति।" "गुरुपदेशात् श्रुति–प्रमाणाच्च" इत्यादि–शास्त्रगत–वाक्यैः एतत् प्रमाणीकृतं वर्तते यत् यदा स्वानुभवेन ब्रह्मात्मनोः ज्ञानं जायते तर्हि ज्ञानेन सम्पूर्णम् आत्मगतम् अज्ञानं नष्टं भवति। तदनु अखण्ड–ब्रह्म– साक्षात्कारः जायते।*

***कुंजीभूत शब्द– सर्वंगी, ग्रंथ, कतआत, ग्रंथ साध महिमा, ग्रंथ निरंजन अष्टक, रज्जब, संत साहित्य, गवाक्ष, धर्मशास्त्र***

अस्माकं सनातन–परम्परायां षट्–आस्तिक दर्शनानि, त्रीणि–च नास्तिक–दर्शनानि प्राप्यन्ते। संस्कृत–व्याकरणानुसारं 'दर्शनम्' इति शब्दस्य व्युत्पत्तिः दृश् धातोः 'ल्युट्' प्रत्यये कृते सति जायते यस्यार्थः भवति–ज्ञानम्, अनुभूतिः, विवेकः[1] इत्यादिः। शोध–पत्रेऽस्मिन् 'दर्शनम्' इति शब्देन 'दर्शनशास्त्रम्' इत्येव अर्थः अभीष्टः वर्तते। विश्वस्य विविध–विद्वद्भिः अनेकविधाः दार्शनिक–सिद्धान्ताः प्रस्थापिताः वर्तन्ते येषु मानवानां दुःखानां स्वरुपम्, कारणम्, तेषां निवृत्तिः, जगतः उत्पत्तिः, पालनम्, संहारः, बन्धनम्, अनुबन्ध–चतुष्टयम्, साधन–चतुष्टयम् इत्यादीनां विशदनिरुपणं प्राप्यते।

विश्वस्य सर्वविध–दर्शनश्रृंखलायां भारतीय–षड्दर्शनानि स्व–गहन–विचारशीलतायाः, तात्त्विकतायाः तथा उत्कृष्ट–तर्क–पुष्टतायाः कारणेन अन्येषाम् अपेक्षया सर्वाधिक–विलक्षणानि, वैज्ञानिकानि सर्व–स्वीकृत–दर्शनानि च सन्ति। सांख्य–योग–न्याय–वैशेषिक–मीमांसा–वेदान्तेत्येतेषु भारतीय– षड्दर्शनेष्वपि वेदान्तदर्शनं सम्पूर्ण–मानव–समूहस्य आध्यात्मिकोन्नतये मनीषिणां ऋतम्भरया प्रज्ञया प्रदत्तं प्रकृष्टतमं वरदानम् अस्ति।

वेदान्तस्य एषः अद्वैत–पक्षः वैदिक–चिन्तनस्य अत्यन्तं सुमचितः नवनीतः अस्ति यः मानव–सृष्ट्याः कृते अत्यन्तं श्रेयस्करः, सच्चिदानन्दात्मकः तथा ज्ञानप्रधानः अस्ति। एतस्य विशद–चिनतनम् उपनिषत्सु, ब्रह्मसूत्रे, श्रीमद्भगवद्गीता–प्रमृतिषु ग्रन्थेषु प्राप्यते। यथोक्तम्–

*"वेदान्तो नामोपनिषत्प्रमाणं तदुपकारीणि शारीरिक–सूत्रादीनि च।"*[2]

एतस्य तात्पर्यम् इदं वर्तते यत् उपनिषत्वाक्यानि, 'अथातो ब्रह्म जिज्ञासा' इत्यादीनि शारीरकसूत्राणि तथा श्रीमद्भगवद्गीता इत्यादीनि आत्यान्तिक–शास्त्राणि 'वेदान्त' इति शब्देन व्यवहृयन्ते।

वैदिक–कालादेव 'आनन्द' इति शब्दः प्रसन्नताताः ब्रह्मस्वरुप–इत्यादयर्थेषु व्यवहृयते–स्म्। एतदेव कारणमस्ति यत् 'आनन्द' इत्येषः शब्दः सत्–चित्–ज्ञानस्य रुपः सर्वप्रकाशकश्च प्रोक्तः वर्तते। ऋषीणाम् एषः चिन्तन–निष्कर्षः वर्तते यत् यस्य प्राप्त्यनन्तरं किदृशी अपि दुःखात्मिका स्थितिः न तिष्ठेत् सा 'आनन्द' इत्युच्यते।

आनन्दस्य लौकिक–स्वरुपस्य तदानीं बोधः भवति यदा कठोपनिषदि नचिकेता यमराजं कथयतिः–

*"श्वोभावा मर्त्यस्य यदन्तकैतत्,सर्वेन्द्रियाणां जरयन्ति तेजः।*
*अपि सर्वं जीवितमल्पमेव,तवैव वाहास्तव नृत्यगीते।*[3]

अर्थात् "हे यमराज! एते भोगाः श्वः स्थास्यन्ति न वा एतादृशाः सन्ति। केवलम् एतावदेव न अपि तु एते सम्पूर्णेन्द्रियाणां तेजः हरन्ति। भोगानां कृते एतत् सम्पूर्णं जीवनमपि अत्यल्पं वर्तते। तस्मात् एतानि सम्पूर्ण–वाहनानि नृत्यसंगीतानि च भवतां पार्श्वे एव तिष्ठेयु"। इत्थं भौतिकसुखानि प्रति नचिकेतसः पूर्णत्यागशीलता प्रदर्शिता अस्ति। अन्यत्रापि यमराजः स्व–विचारान् प्रकटयति यत्

"इमा रामाः सरथा सतूर्या नही दृशा लम्भनीयाः मनुष्यैः।
आभिर्मत् प्रत्ताभिः परिचारयस्व नचिकेतो मरणं मानुप्राक्षीः।।[4]

यमराजः नचिकेतसं प्रलोभयति यत् मनुष्यलोकस्य दुर्लभोगान यथेच्छं भुञ्जस्व, दिव्यसुन्दरिभिः सेवां कारय इत्यादि । परन्तु नचिकेता सर्वं किमपि अस्वीकृत्य परमात्म–तत्वं सच्चिदानन्दम् मृत्योः रहस्यञ्च प्राप्तुं कथयति। एतदानन्द–प्राप्तये अद्वैतवेदान्ते अनेके उपक्रमाः रेखाड़िकताः वर्तन्ते। 'वेदान्तसार'–नामक ग्रन्थस्य प्रारम्भे एव सदानन्द'यति–महोदयैः प्रोक्तं वर्तते यत् एतस्याः वेदान्त–विद्यायाः अध्ययनस्य अधिकारी स एव भवितुं शक्नोति–

**अ**–येन अस्मिन् जन्मनि पूर्वजन्मनि वा सम्यक्तया सम्पूर्ण–वेद–वेदाड़्गादीनाम् अध्ययनं कृतं भवेत्। यतोहि इत्थं करणेन स्वयमेव तस्य सम्पूर्ण–वेदानाम् अर्थज्ञानं भविष्यति।

**ब**–यस्य अन्तःकरणं काम्य–निषिद्ध–कर्मणाम् अकरणेन सर्वथा निष्पापं च भवेत्।

**स**–यः नित्यानित्य–वस्तु–विवेक–इत्यादि–साधन–चतुष्टयेन युक्तः भवेत्।

इत्थम् आत्मगताज्ञानस्य तज्जन्य–सकलप्रपञ्चस्य च निवृत्तिपूर्वकं तत्स्वरुप–परिचयेन अखण्डानन्दस्य प्राप्तिः भवति।

यथोक्तम्–"अधिकारी तु विधिवदधीतवेद–वेदाड्गत्वेनापाततोऽधिगताखिले वेदार्थे जन्मनि जन्मान्तरे वा साधन–चतुष्टय –सम्पन्नः प्रमाता।"[5]

इयमेव वार्ता 'तरति शोकमात्मवित्' 'ब्रह्मैव भवति' इत्यादि–श्रुतिभिरपि प्रोक्ता वर्तते। एतत् सर्वथा सिद्धं वर्तते यत् जीव–ब्रह्मणोः ऐक्यमेव वास्तविकानन्दस्य स्वरुपम् अस्ति। अन्यत्रापि प्रोक्तं वर्तते

*"यमष्टिव्ययष्ट्योरीश्वरप्राज्ञयोरभेदत्वञ्च आनन्दभुक् चेतोमुखः प्राज्ञः इति श्रुतेः च।*[6]

**अनुरूपी लेखक/ संयुक्त लेखक**

अर्थात् प्रलयकाले ईश्वरः सुषुप्ति–काले च प्राज्ञः द्वावपि आनन्द–प्राचुर्यत्वात् स्वात्मानुभवं कुरुतः किन्तु आनन्द–प्राप्त्याः अनुभूतिं तौ कथं कर्तुं शक्नुतः? एतस्य प्रश्नस्य समाधानं 'तदानीम्' इत्यादि–द्वारा क्रियमाणं वर्तते अर्थात् अंतःकरणस्य वृत्तीनां समानमेव चैतन्य–प्रदीप्ताज्ञानस्यापि सूक्ष्मवृत्तयः भवन्ति। अतः स्व–स्व– अस्पष्ट–अज्ञानवृतिभिः ईश्वरेण प्राज्ञेनापि च प्रलय–सुषुप्त्योः अवस्थायां स्वरुपानन्दः अनुभूयते, एतदेव तथ्यं माण्डूक्योपनिषदि अपि प्रोक्तं वर्तते। यथोक्तम् :–

*"सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक्–चेतोमुखः प्राज्ञः।।[7]*

सुषुप्ति–दशायाम् आनन्दानुभवति, एतस्य अन्यत् प्रमाणमपि प्रदत्तं वर्तते। तदित्थम्– सुखमहमवाप्सम्–।" अर्थात शयनानन्तरं कश्चिदपि कथयति" अहं सुखपूर्वकं शयितवान् इति। एतेन एतत् स्पष्ट भवति यत् तस्यां दशायां बाह्य–साधनानाम् अभावकारणेन यद्यपि आत्मनः बाह्यज्ञानं न भवति परन्तु आनन्दानुभवनात्मकम आन्तरिकं ज्ञानं भवति। अनेनैव कारणेन सांख्यदर्शनस्य "समाधिसुषुप्तिमोक्षेषु ब्रह्मरुपितां इत्यस्मिन् सूत्रे महर्षि–कपिल–महोदयः स्पष्टीकरोति यत् समाधौ, सुषुप्त्यां मोक्षे च एतासु त्रिषु दशासु आनन्दानुभव–कारणेन आत्मा ब्रह्मरुपतां प्राप्नोति। एतेन इदं स्पष्टं भवति यत् प्रलये सुषुप्ति–दशायाञ्च ईश्वरः प्राज्ञश्च स्व–अल्पज्ञत्वादि–कारणेन आनन्दम् अनुभवतः। आनन्दस्य एतत् सिद्धान्तं यदि कश्चित् स्वीकरोति तर्हि

"पुनरपि जननं पुनरपि मरणं, पुनरपि जननी–जठरे शयनम्
इह संसारे खलु दुस्तारे कृपया पारे पाहि मुरारे।।[8]

तस्य दुःखेभ्यः सार्वकालिकी मुक्तिः जायते। सम्पूर्णस्य विश्वस्य दुःखम् अज्ञान–कारणेन अविद्या–कारणेन वा अस्ति किन्तु ज्ञान–द्वारा अज्ञानान्धकारस्य विनाशः जायते। यदि कश्चिद् कथयति यत् आनन्दं कर्मजन्यम् अस्ति तर्हि एतत् संभवं नास्ति यतोहि गीतायां प्रोक्तं वर्तते :– "ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा"।[9]

यदा चिज्जडग्रन्थ्याः उद्भेदः –ज्ञानेन जायते तदा ब्रह्मणः वास्तविकस्वरुप स्य बोधः भवति। अतएव प्रोक्तं वर्तते।

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे।।

अर्थात् ब्रह्मणः स्वरुपे बोधे सति जड़–चेतनयोर्मध्ये अज्ञानकारणात् या चिज्ज–ड–ग्रन्थिः निर्मिता वर्तते, सा उद्घटिता भवति, समेऽपि संशय–भ्रमादयः दूरीभवन्ति तथा कर्मबन्धनानि क्षीणानि जायन्ते उपनिषत्सु अपि इत्थं प्रोक्तं वर्तते यत् "तमसो मा ज्योतिर्गमय" इति। अज्ञानस्य स्वरुपम् अनिवर्चनीयम् वर्तते । अतः ज्ञानप्राप्तिं बिना अज्ञानस्य नाशः भवितुं न शक्नोति। नैव च आनन्दस्य प्राप्तिः भवितुम् अर्हति। अतएव अद्वैतवेदान्तस्य पञ्चीकरणे त्रिवृत्करणे च एतत् विधानं कृतम् अस्ति यत् "असर्पभूतायां रज्जौ सर्पारोपस्तु अध्यारोपः। वस्तुतस्तु सच्चिदानन्दानत्मकं ब्रह्म अज्ञानादि–सकल–जड़–समूहोऽवस्तु।"[10]

अध्यारोपे वस्तुनि अवस्तुनि च अपेक्षितानि सन्तिः। रज्जौ सर्पस्य अध्यारोपे जाते सति रज्जुः वस्तु वर्तते सर्पश्च अवस्तु अस्ति। अनेनैव प्रकारेण ब्रह्मणः जगतश्च सम्बन्धिनि अध्यारोपे सर्वदा सर्वत्र च विद्यमानं स्वयंप्रकाशं चेतनतत्वम् आनन्द–स्वरुपं ब्रह्मवस्तु अस्ति। सम्पूर्णं जगत् ब्रह्मस्वरुपम् अस्ति इति स्वीकारोक्तिः जीवन्मुक्तिः इत्यपि उच्यते विदेहमुक्तिः इत्यपि च। यथा वेदान्तसारे जीवनमुक्त्याः लक्षणं प्रतिपादयन् आदरणीयः सदानन्द–यतिः कथयति–

"अथ जीवन्मुक्त–लक्षणमुच्यते। जीव–मुक्तो नाम ......ब्रहम निष्ठः।[11]

अर्थात् गुरुपदेशेन श्रुति–वाक्यैः तथा स्वानुभवेन च यदा ब्रहमात्मैक्यज्ञानं जायते तर्हि ज्ञानेन आत्मगत–कलाज्ञाननष्टत्वात् अखण्ड–ब्रह्मणः साक्षात्कारः भवति। एतादृश्यां स्थित्यां मूलज्ञानम् तथा तत्कार्यरुप–सञ्चितकर्माणि, संशयाः, विर्प्यादयः सर्वं किमपि नष्टं भवति। अतः सम्पूर्ण–बन्धन–राहित्यात् केवलं ब्रहमणि एवं आत्मनः तत्परता तिष्ठति। एतादृशाः ब्रह्मनिष्ठाः एव जीवनमुक्ताः इति कथ्यन्ते। इत्थम् एतादृग् आनन्दस्य अवबोधायः विवेक–चूडामणिः, पञ्चदशी, ब्रहमसूत्रम् इत्यादि–ग्रन्थानां व्यवस्था कृता अस्ति।

यथा सर्वेभ्यः वेदमंत्रेभ्यः आरभ्य उपनिषदां प्रत्येकं वर्णं यावत् ऋषिभिः जीवानाम् आनन्दप्राप्तये व्यवस्था कृता वर्तते तथा विविध–आख्यानैः सरलतया बोधयितुं प्रयत्नोऽपि कृतः वर्तते। यथा एकस्य गन्तव्य–स्थानस्य प्राप्तये वयं विविध–मार्गाणां साधनानाञ्च आश्रयं स्वीकुर्मः तथैव परब्रह्म–परमात्मनः साक्षात्कारेण अज्ञाने नष्टे सति आनन्दस्य सुखस्य वा प्राप्तिं कुर्मः। यथा सांख्य–कारिकायां ईश्वरकृष्णः कथयति– दुःखत्रयाभिघाताज्जिज्ञासा तदभिघातके हेतौ।

दृष्टे सापार्थाचेन्नैकान्तात्यन्ततोऽभावात्।।[12]

इत्थम् 'अथातो ब्रह्मजिज्ञासा' 'अथातो धर्मजिासा' इत्यादिर्भियोगस्य, धर्मस्य ब्रह्मादेः बोधस्य लक्ष्यमपि दुःखानां नाशस्य आनन्दप्राप्तेश्च साधनमेव अस्ति। अस्यैव आनन्दस्य स्वरुप–प्रतिपादनस्य क्रमे वेदान्तान्तर्गतस्य अज्ञानस्य, ब्रह्मणः अध्यारोपस्य, अपवादेत्यादीनां चिन्तनं कुर्वता तत्स्वरुपस्य चर्चा यथास्थानं द्रष्टुं शक्यते। इति दिक्

## संदर्भ ग्रंथ सूची

1. संस्कृत–हिन्दी–कोश–वामन शिवराम आप्टे।
2. वेदान्तसार श्रीसदानन्द यति।
3. कठोपनिषद्–1/26.
4. कठोपनिषद्–1/24.
5. वेदान्तसार, पृ0–6.
6. वेदान्तसारः–पृ0 23.
7. माण्डूक्योपनिषद्।
8. भजगोविन्दम् (चर्वटञ्जरिका–स्तोत्रम्) श्रीमदाद्य गुरु शंकराचार्य कृत, श्लोक–8.
9. श्रीमदभगवद्गीता,–4–67.
10. वेदान्तसारः।
11. वेदान्तसारः।
12. सांख्यकारिका, श्रीईश्वरकृष्ण विरचित।

*****